শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী শঙ্করাচার্য ৱিরচিতম্

# ॥শ্রীরামপঞ্চরত্নম্॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰীরামপঞ্চরত্নম্ ॥

কঞ্জাতপত্ৰাযত লোচনায কর্ণাৱতংসোজ্জ্বল কুণ্ডলায।
কারুণ্যপাত্ৰায সুৱংশজায নমোস্তু রামায সলক্ষ্মণায॥ ১ ॥

ৱিদ্যুন্নিভাম্ভোদ সুৱিগ্ৰহায ৱিদ্যাধরৈসসংস্তুত সদগুণায।
ৱীরাৱতারায ৱিরোধিহর্ত্রে নমোস্তু রামায সলক্ষ্মণায॥ ২ ॥

সংসক্ত দিৱ্যাযুধ কার্মুকায সমুদ্ৰ গর্ৱাপহরাযুধায।
সুগ্ৰীৱমিত্ৰায সুরারিহন্ত্রে নমোস্তু রামায সলক্ষ্মণায॥ ৩ ॥

পীতাম্বরালঙ্কৃত মধ্যকায পিতামহেন্দ্ৰামর ৱন্দিতায।
পিত্ৰে স্বভক্তস্য জনস্য মাত্ৰে নমোস্তু রামায সলক্ষ্মণায॥ ৪ ॥

নমো নমস্তেখিল পূজিতায নমো নমস্তেন্দুনিভাননায।
নমো নমস্তে রঘুৱংশজায নমোস্তু রামায সলক্ষ্মণায॥ ৫ ॥

ইমানি পঞ্চরত্নানি ত্ৰিসন্ধ্যং যঃ পঠেন্নরঃ।
সর্ৱপাপ ৱিনির্মুক্তঃ স যাতি পরমাং গতিম্॥ ৬ ॥

॥ইতি শ্ৰীরামপঞ্চরত্নম্ সমাপ্তম্ ॥